श्रीगणेशायनमः॥ ॥युधिष्ठिरउ०॥कथ्यतांषष्ठीविधानमाहात्म्यंकथयस्वजना
र्दन॥धन्यंशस्यमारोग्यंपुत्रसौख्यप्रदायकं॥१॥व्रतानांपरमंपुण्यंपवित्रंपाप
नाशनं॥हस्त्यश्वरथसंकीर्णंदासीदासादिकंकुलं॥२॥धनधान्यसमायुक्तं
गृहंयेनभवेदिदं॥तद्व्रतंषष्ठीसंदंयद्यद्गुह्यंतववल्लभः॥३॥ ॥श्रीकृष्णउ०
कथयामिपरंगुह्यंयन्नलोकेषुदृष्टवान्॥पुरारथंतरेकल्पेब्रह्मणापद्मयो
निना॥यद्व्रतंकथितंपार्थस्कंदायामिततेजसे॥४॥ ॥स्कंदउ०॥नास्तिव्रतं
परंब्रह्मन्नस्तिरंपापविनाशनं॥कथयस्वमहाभागयद्यस्तिविदितंतव॥५॥ ॥
ब्रह्मो०॥मासिभाद्रपदेपक्षेषष्ठ्यांचसंयते॥रोहिण्यांचैवनक्षत्रेयतीपि
तनयेमुख॥६॥अस्मिन्योगेसमस्तेचनाडिकापिचदृश्यते॥यदिहस्तसहस्त्रा ॥१॥

भ॰२

स्तदाकार्यंव्रतंबुधैः॥७॥यदैवप्राप्यतेयोगःकदाचित्कालपर्ययात्॥कृतिकानामसा
ज्ञेयातिथिःपरमदुर्लभा॥तस्यांदत्तंकृतंजप्तंसर्वकोटिगुणंभवेत्॥८॥शृणुराज
न्विधानेनकथ्यमानंमयानघ॥पंचम्यामेकभुक्तंचकुर्यादत्रविचक्षणः॥९॥
षष्ठ्यांप्रातःसमुत्थायकृत्वादंतधावनं॥जलेनृपौजलीकृत्वाइमंमंत्रमुदीरयेत्॥१०॥
॥अथनियममंत्रः॥निराहारोधरदेवश्चद्वक्ष्यात्वत्परायणः॥पूजयिष्याम्यहंदेवश्रा
वणंभवभास्करइतिनियमंत्रः॥॥पूर्वेदत्तेतिसंकल्पंकृत्वाप्रातःशुचिस्ततः॥स्नानं
कुर्यात्प्रयत्नेननद्यांतीर्थेगृहेपिवा॥१२॥तडागेवापिकूपेवादीर्घिकायांह्रदे
पिवा॥दिवाकृत्वाशरीरंकुंकुमेनामनःशिला॥१३॥पवित्रेपद्मकंयस्मिंमधुगंधे
नपूरयेत्॥क्षीरेणालोड्यकलशंस्नानंकृत्वासमंत्रकं॥१४॥पंचगव्येनवास्ना ॥२॥

नपंचभागेस्नमन्त्रयेत्तं॥ आनयेन्मृत्तिकांमुद्धांस्नानार्थंतुप्रयत्नतः॥१६॥तन्त्रमंत्रः
मृत्तिकेहरमेपापंयन्मयापूर्वसंचितं॥त्वयाकृतेनपापेनसर्वपापैःप्रमुच्यते॥१७॥मंत्रे
णानेनवरुणंप्रार्थयेद्बुद्धिमान्नरः॥ वरुणस्त्वमसिदेवज्योतिषांपतिरेवच॥१८॥
पापंनाशयमेदेवयाज्ञनःकर्मभिःकृतं॥१९॥स्नात्वाचानेनमंत्रेणपरिधायचवास
सिभास्करंपूजयेत्तत्रारथस्यंपंकजोपरि॥२०॥आदिभास्करोभानुःरविस्तूर्यादि स्यो ५
वाकरःप्रभाकरोथविष्णुश्चंदवःसर्वेश्वरोहरिः॥तरथंकारयेद्यत्नात्तत्सोवर्णैर
ज्ञतेनवा॥शक्तितस्तुमपत्राढ्यंदीप्तेर्धकर्षतोपिवा॥२१॥सहस्ररश्मिंस ॥२॥
र्वंचस्थूलसूक्ष्मगुणान्वितं॥सर्वगंसर्वरूपंचमध्येभास्करमेवच॥२२॥सप्ताश्व
रथमारूढंपद्महस्तंदिवाकरं॥चतुःसत्रधनुःपाणिंकुंडलेमुकुटेनच॥२३॥

रत्नैर्नानाविधैर्युक्तंसोवर्णंतत्रकारयेत्॥सप्ताश्वैर्भूषितंकृत्वारथंतस्याग्रतः
स्थितं॥२४॥अरुणंविनतापुत्रंगृहीताश्वंसरश्मुकं॥तत्रंगेहस्तुचोदंश्चकृत्वा
गोमयमंडलं॥२५॥मंडलेसर्वतोभद्रमालिखेद्बुद्धिमान्नरः॥तन्मध्येचलिखेत्पद्मं
अष्टपत्रंसकर्णिकं॥२६॥पूर्वपत्रेलिखेत्सूर्यमाग्नेयांतपनंतथा॥सुवर्णरेतसं
याम्येनैर्ऋत्यांचरविंन्यसेत्॥२७॥आदित्यंवरुणेपत्रेवायव्यंचदिवाकरं॥सोम्ये
प्रभाकरंतत्रसूर्यमीशानपत्रके॥२८॥एवंसंस्थाप्यविधिवत्पूजयेच्चक्रमाद
यं॥मध्येरथंचसंस्थाप्यपंकजेनोपशोभितं॥२९॥तस्योपरिन्यसेद्देवंरक्तचंद
नचर्चितं॥अग्रतःसारथिंतस्यपूजयेदरुणंशुभिः॥३०॥रक्तपुष्पैस्तुगंधै
श्चतथान्यैरपिभक्तितः॥अरुणंपूजयेद्यस्तुमंत्रेणानेनसुव्रत॥३१॥अथमंत्रः॥
ॐविनतातनयोदेवकर्मशक्तितमोहरः॥सप्ताश्वःसत्वरश्चाग्यःअरुणोमेप्रसी
दतु॥३२॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

११३११

मंत्रेणानेनसंपूज्यसारथिंतदनंतरं॥देवस्यासनंकुर्यात्प्रभुरादिस्तुपंचकं॥३३॥दी
प्तांशुःशक्तिभिस्त्वेवंततोभानुंप्रपुजयेत्॥सौरशास्त्रोक्तमार्गेणपादंतस्तदनंत
रं॥३४॥मार्त्तंडंभानुमादित्यंभास्करंतपनंहरिं॥हंसंदिवाकरंचेतिपादंतामु
कुरावधिं॥३५॥पादोजंघेतथाजानूउरुद्वयकटिंतथा॥तोयंपुष्पंफलंचंदनं॥
नाभोचक्षुःस्थलंग्रीवमष्टांगेषुप्रपुजयेत्॥३६॥करवीरार्ककुसुमश्चंदनागरुपं
कजैः॥ताम्रपात्रेस्थितंतोयंसर्जदद्यात्समंत्रकं॥३७॥पात्रंकृत्वातथातोयं
सपुष्पफलचंदनं॥जानुभ्यामवनिंकृत्वासूर्यार्घंविनिवेदयेत्॥३८॥॥अर्घमंत्राः॥
वेदगर्भनमस्तुभ्यंवेदगर्भनमोस्तुते॥अमूर्त्तमूर्त्तयेतुभ्यंग्रहाणार्घ्यंनमोस्तु
ते॥३९॥त्वंब्रह्मात्वंचविष्णुश्चरुद्रस्त्वंचप्रजापतिः॥त्वमेवसर्वभूतात्मा

ॐसूर्यग्रहेभ्यो नमोस्तुते॥४०॥जन्ममृत्युजरारोगसंसारभयनाशनः॥दारिद्र्यव्यस
नध्वंसी ॐसूर्यग्रहेभ्यो नमोस्तुते॥४१॥सुवर्णस्फटिकोभानुस्त्वर्णरेतादिवाकरः॥
हरिदश्वोंशुमालीचग्रहाणांसूर्यनमोस्तुते॥४२॥त्वंहिसूर्यसहस्रांशोतेजोराशिज
गत्पते॥ॐअनुकंपयमांभक्त्याग्रहाणांसूर्यनमोस्तुते॥४३॥कालात्मासर्वभूता
त्माविश्वात्मासर्वतोमुखः॥यस्मादग्निंदुरुपस्थःॐग्रेपाहिप्रभाकर॥४४॥ॐपद्म
नुजरारोगसंसारभयनाशनः॥दारिद्र्यव्यसनध्वंसीश्रीमान्पात्वंदिवाकरः॥४५॥
ॐअग्निमीजेनमस्तुभ्यंमित्रायभास्करायच॥ॐअग्नआयाहिवरदेनमस्तेजोनिधे
पते॥४६॥शन्नोदेवीनमस्तुभ्यंजगच्चक्षुःसनातनः॥इतिमंत्रान्समुच्चा
र्यनमोस्त्वितिचभास्कर॥४७॥संवर्चसेतिपाणिभ्यांतोयेनाविश्यजेन्मुखं॥ह ॥४॥

स्पृश्यसूर्यस्यवावलोकनं॥४८॥ततस्तंचित्रसूक्तेनभानोरग्रेजपे
द्बुधः॥नैवेद्यधूपदीपैश्चतांबूलादिभिरर्चयेत्॥होमंकुर्याद्द्विजाचार्यैःस
र्वलक्षणलक्षितं॥शुचिःशीलःसदाचारःसूर्यभक्तिसमन्वितः॥५०॥पू
जयेद्भूषणैर्भव्यैरंगुलीयककुंडलैः॥तत्रवह्निंसमाधायसंदिशंपूजयेद्द्वि
जः॥५१॥स्वगृह्योक्तविधानेनहोमंकुर्यात्प्रयत्नतः॥ॐअर्कजाभिःसमिद्भि
श्चघृतमिश्रास्तिलैरपि॥५२॥समिधश्चचरुंचैवघृतेचजुकुयाद्द्विजः॥
ॐआकृष्णेनेतिमंत्रेणशतमष्टोत्तरंक्रमात्॥५३॥तोस्तिलानपितेनैव
माकृत्यादिहेभिर्वातिलान्॥स्विष्टकृत्वाविधानेनकृत्वाचलघनंतरं॥५४॥
ॐअनेनविधिनाराजन्प्राप्तराज्यमकंटकं॥ॐहावतमिदंपुण्यंसर्वदुःखवि
नाशनं॥५५॥

॥अतःपरंप्रवक्ष्यामिदानस्यफलमुत्तमं॥मद्दैवेमयेपात्रेसादरंत्वाचार्य्यायभ
वेत्॥५६॥व्रतंसर्वव्रतंश्रेष्ठमिदंमुख्यंमहाफलं॥तारयिष्यतिदातारंनरंन
मत्तप्रमत्तमयं॥५७॥एवंदेवःगणासर्वेभूतसंघाश्चहर्षिताः॥आकाशा
त्स्वःप्रनृत्यंतिपुण्यस्मिन्दिवसागमे॥५८॥पात्रभूतायकृषयेश्रोत्रिया
यागुरुंबिने॥एवंयःकपिलांदद्याद्भक्तिभावसमन्वितः॥५९॥सयाव
त्तिपरमंस्थानंयस्मान्नायातिनेपुनः॥पंचरत्नसमायुक्तंदुर्वापुष्पाक्ष
तान्वितं॥६०॥रक्तवस्त्रयुगाच्छिन्नंताम्रपात्रेणसंयुतं॥नमोस्तुविष्ण
वेविप्रविष्णवेत्रेनमोस्तुते॥६१॥एवंसंपूज्यविधिवद्देवंदिवाकरं॥ ५१
पूजयेत्कपिलांधेनुंवस्त्रमाल्यानुलेपनैः॥६२॥दिव्यस्त्रीनृत्यगंधर्व

द्वीदशात्मादिवाकरः॥कपिलासहितोदेवोममभक्तिंप्रयच्छतु॥६३॥तस्मा
त्तस्तुकपिलापुण्यासर्वलोकस्यपाविनी॥प्रदत्तासहस्रर्यैणममभक्तिंप्रय म २
च्छतु॥६४॥कपिलांपूजयेद्देवीसर्वपापनाशिनीं॥सवस्त्रयुग्मघंटांच
सर्वाभरणभूषितां॥६५॥सुवर्णशृंगीरूप्यखुरांकांस्यपात्रस्यदोहनीं॥
ब्राह्मणायप्रदातव्यामंत्रेणानेनभक्तितः॥६६॥गावोममाग्रतःसं
तुगावोमसंतुपृष्ठतः॥गावोमेहृदयेसंतुगवांमध्येवसाम्यहं॥६७॥
गांदृष्ट्वातुनमस्कृत्यकृत्वाचैवप्रदक्षिणां॥प्रदक्षिणीकृतातेनसप्त
द्वीपावसुंधरा॥६८॥तिलपात्रंततोदद्यात्सुवर्णेनयुतंशुभं॥पंचा
क्षविधंचैवब्रह्मविष्वीसदैवते॥६९॥वस्त्रंतिलपरिधानंवृषभंचांगि

राधिपुं॥वारुणंचततोदेयंदानानिविविधानिच॥७०॥ ॥अथातःसंप्र
वक्ष्यामिइतिहासंपुरातनं॥पुरावैसेनुजिन्नाम्नाराजाभूद्वसुधातले॥७
सर्वैस्तत्रगुणैपेतोदयादाक्षण्यसंयुतः॥प्रजापालयतेनित्यंपुत्रानिव
महौजसः॥७२॥समुद्रइवगांभीर्येसत्येधैर्येचहिमवानिव॥मनोभरिव
सौंदर्येशौर्येचाग्निरिवापरः॥७३॥क्रोधेचैवस्वतःसाक्षात्क्षमयापृथि
वीसमः॥बुध्याचोशनसंतुल्योदानेबलिरिवापरः॥७४॥तस्यभार्यामहा
साध्वीसाचसर्वगुणान्विता॥रूपयौवनसंपन्नापतिव्रत्यपरायणा॥७५॥वदान्याशीलसंपन्नासदाचैवव्रतचारिणी॥ब्रह्मण्यंयुरुंप्राप्यप्रपच्छपरमादरात्॥७६॥विरदेवीतिविख्याताससर्वैसौख्य
समन्विता॥

सा:संगतोदृष्टंसर्वंश्रेष्ठमनंदिते॥व्रतस्यास्यप्रभावेनसर्वसौख्यंकलेवरे॥ ई·वी५
कस्पेयंकर्मणोब्राह्मिजयातुष्टिरनुत्तमा॥७७॥पतिर्मेपरमोदारस्तनयाश्चमनो
नुगाः॥भृत्याश्चवशगानित्यंपरिवारोपिवाचकः॥७८॥तस्यास्तद्वचनंश्रुत्वा
ब्रह्मयज्ञपुरोहितः॥तत्सर्ववत्कुमारेभ्यःकृपयाहृदयंनिवत्तन्मनः॥७९॥ ॥ब्र
ह्मयज्ञउ०॥पुरावेश्यकुलेजातादेवीत्वंवरवर्णिनि॥कपिलाषष्ठीव्रतंदेवी
क्रियमाणंत्वयानघे॥८०॥ ॥विरदेवीउ०॥यदितुष्टोसिमेब्रह्मन्यदिमेसु
कृतंकृतं॥व्रतस्यास्यविधिंब्रूहियत्सुनःप्रकरोम्यहं॥८१॥ततस्तस्याःव
चःश्रुत्वाब्रह्मयज्ञपुरोहितः॥व्रतचर्यांनशेषांश्चकथयामाससत्तम॥८२॥
मासिभाद्रपदेकृष्णेषष्ठ्यांतुभरणिजे॥रोहिणीनामनक्षत्रेमतिपा
तेनसंयुता॥८३॥यस्मिन्योगेसमस्तेस्यात्तद्घटिकापियदातिथिः॥

यदिस्तेसहस्रांश्युतदाकार्यंव्रतंबुधैः॥८५॥यद्येवंप्राप्यतेयोगःकदाचित्तर्कीसपर्यये॥कपिलानामसाज्ञेयाहत्याकोटिविनाशिनी॥८६॥तस्माद्दत्तंकुलंसर्वंकोटिगुणंभवेत्॥कपिलांपूजयेद्देवींसवस्त्रांपापनाशिनिं॥८७॥वस्त्रयुग्मसघंटांचस्वर्णशृंगविभूषितां॥स्वर्णस्यांरूप्यखुरांकांस्यपात्रोपदोहिनां॥८८॥ ॥गोपूजामंत्रः॥ॐनमस्तेकपिलेदेवीसर्वपापप्रणाशिनी॥संसारार्णवमग्नामांगौर्मातस्त्रातुमर्हसी॥मंत्रेणानेनतांदद्याद्ब्राह्मणायसचशक्तितः॥८९॥=अथधेनुप्रार्थना॥कपिलासर्वदेवानांपूजनीयासिरोहिणी॥सर्वतीर्थमयीयस्मादतःशांतिंप्रयच्छमे॥९०॥यालक्ष्मीःसर्वदेवानां॥७॥याचदेवेश्वस्थिता॥धेनुरूपेणसादेवीममशांतिंप्रयच्छतु॥९१॥विष्णो

स्वधातेपितृमुँक्तानांस्वाहायज्ञभुजामपि॥वषट्याप्रोच्यतेलोकैःसाधेनुवरदास्तुमे॥९२॥

वैक्षत्रियालक्ष्मीःस्वाहायाचविभावसोः॥अलक्ष्मीर्यालोकपालानांसाधेनुवरदास्तुमे॥९३॥गावोममाग्रतःसंतुगावोमेपृष्ठतःसदा॥गावोमेहृदयेसंतुगवांमध्येवसाम्यहं॥९४॥पंचगव्यसमुत्पन्नामध्यमानेमहोदधौ॥तासांमध्येतुयानंदातस्मैधेन्वैनमोनमः॥९५॥=अदितिर्देवमाताचवेदमाताचधीश्वरी॥धेनुरूपेणसादेवीममपापंव्यपोहतु॥९६॥=अथब्राह्मणप्रार्थना॥विष्णुरूपद्विजश्रेष्ठ॥ब्राह्मणान्भोजयेत्पश्चात्पायसेनगुडेनच॥शक्त्यैतुदक्षिणांदद्यात्तेभ्यश्चैवविशेषतः॥९७॥=अस्मिंस्तोपियःकश्चिन्मोघंकुर्यादिदंव्रतं॥आत्मशक्त्यनुसारेणसोपितत्फलमाप्नुयात्॥९८॥कपिलारोमसंख्यातंसूर्यलोकेमहीयते॥दातारंस्वजनोपेतंब्रह्मलोकंनयत्यु॥९९॥

क्षपयित्वा तुनांशत्रिंगीतवादित्रनिःस्वनैः॥ततस्त्वभ्युदितेसूर्येहोमंकुर्या
त्स्वशक्तितः॥९००॥पूजयेच्चततःशक्त्यादेवांश्चविधिवद्गुरुं॥सूर्य
पूजांततःकुर्यात्कणवीरैश्चंपकैस्तथा॥९०१॥सरयंतपनंचैवप्रदद्याद्गु
रवेसुधीः॥गुरवेदक्षिणांपूर्वंमंत्रेणानेनयत्नतः॥२॥॥दानमंत्रः॥भस्कि
रोबुद्धिदाताचद्यस्मात्तोभस्करंस्वयं॥भास्करस्यप्रदातातवैतेनवैभास्क
रोमम॥९०३॥भास्करःप्रतिगृह्णातिभास्करोयंददातिच॥भास्करस्तार
कोभाभ्यांतेनवैबुद्धिदस्तदा॥४॥एतेनविधिनाषष्ठीकपिलारूपांसुशो ॥८॥
भनां॥करुतेतुनरोयोवैतस्यपुण्यफलंशृणु॥५॥अश्वमेधसहस्त्रा
णिवाजपेयशतानिच॥क्रत्वातत्फलमाप्नोतितस्मादष्टगुणंभवेत्॥६॥

सोमपर्वसहस्रस्यसूर्यपर्वशतस्यच॥समेयंकपिलाषष्ठीइत्याहकपिलोमु
निः॥७॥पुराद्यधिराजेनबृहस्पतुपदेशतः॥सर्वदेवैःसमंकृत्वाजितः ता २
दैत्यायाजयत्॥८॥कृतेयंभद्रभुजाभक्त्याबृहस्पतुपदेशतः॥योवेना
श्वेतमांधात्रासगरोनयातिना॥९॥दीलीपेनचभूपेनहैहयेनार्जुनेन
च॥कपिलादेनविप्रेणसुलोकेप्रकाशिता॥९०॥तेनसाकपिला
क षष्ठीसंज्ञिकालोकेविख्याताँइमांकृत्वाविधानेनप्राप्तेराज्यमकंटकं॥११॥
इष्ट्वालोकान्गतःसोसौस्वेच्छयाकृतयानया॥कल्पकोटिसहस्रा
णिकल्पकोटिशतानिच॥१२॥सूर्यलोकेवसेत्तावद्यावत्तांकपि
लांचरेत्॥ ॥युधिष्ठिरउ०॥कथंकृत्स्नभूजिताराँचकपिलानामसातिथिः॥

दानपुण्यरतःश्रीमान्नदयादक्षिणयेनृपः॥३॥

कथा १

प्रभावञ्चकथंतस्याःब्रूहिमेवदतांवर॥१३॥ ॥श्रीकृष्ण उ०॥सृष्टिकालेचुतस्यास्त्वमतःशृणुनरेश्वर॥पूर्वमासीन्मुनिर्विप्रःकपिलोनामनामतः॥१४॥पितुःदायाहःसंप्राप्तस्तस्यविप्रस्यधीमतः॥तस्मिन्नहनिराजेंद्रद्विजानामंत्रभक्तितः॥१५॥कालेचकुतुपेप्राप्तेश्राद्धकर्माविधानतः॥दास्यामिदक्षिणांविप्राःइतिप्रोवाचधर्मवित्॥१६॥प्रतिगृह्यद्विजातिभ्यःश्राद्धकर्माणिदक्षिणां॥पंचत्वमगमत्तूष्णींदक्षिणांतामदत्तवान्॥१७॥यज्ञास्तेनकृताःसर्वेबहुभिर्दक्षिणाः॥तेनैवकर्मणाचैवनरकेपतितोमुनिः॥१८॥सोऽशरीरमास्थायजगामयममंदिरं॥ददर्शचयमंतत्रयमदूतैःसमन्वितं॥१९॥पाशदंड

कथा २

धरैरुग्रैर्विकृतैर्लोमहर्षणैः॥कृत्वाबंधञ्चतैर्भिन्नाबंधैर्दृढैस्तथा॥२०॥रौरवादिषुघोरेषुदुःखेसुनरकेषुच॥तिर्यक्त्वेषस्तथाप्येषपिपर्यंतेतपकर्मिणः॥२१॥एवंकालक्रमेणैवयातमानःसदारुणैः॥पप्रच्छदूतमासन्नंब्रूहिमेयमकिंकरः॥२२॥ ॥कपिलउ०॥केनकर्मणामेदुःखमीदृशंसमुपस्थितं॥कारुण्यात्तस्यविप्रस्यप्रत्युवाचसकिंकरः॥२३॥ ॥यमकिंकरउ०॥श्राद्धंकृत्वात्वयादत्तादक्षिणानप्रतिग्रहता॥तेनपापेनघोरेणपच्यतेनरकाग्निवे॥२४॥एवमुक्तंतस्तेनचिंतयापीडितोभवत्॥ ॥इत्थंकालेव्रजत्येषांपुण्यशेषेणभूमिद॥२५॥सत्यजिन्नामराजेंद्रोमहाभूतिसमन्वितः॥प्राप्तेकालेनुराजासोमत्युजोकाञ्चराधिपःस्व॥

दृष्ट्वातेनसमायान्तोविमानेनार्कवर्चसा॥तस्यतेदृष्टिमात्रेणयमदूताःप
लायिताः॥२७॥नारकाश्चैवतेसर्वेमुक्तिंतांनरकाणीवात्र॥सुखेनसेतु
संजातामृभकार्यामहोजसः॥२८॥उक्तास्तेनैवतेस्पष्टाःकिमतद्भवता
मिदं॥प्रध्वस्तातेइदंप्रोचुर्भूपतेस्तवदर्शनात्॥२९॥सर्वदुःखविनि
र्मुक्तैःसंजातान्नृपसत्तम॥एवमुक्तेतुसंतुष्टोराजानंकपिलोब्रवीत्॥३०॥
कपिरउ०॥केनपुण्येनराजेंद्रतवदर्शनमिदृशं॥प्रत्युवाचस्तंविप्रंप्रीति
तःक्रियतामिते॥३१॥ ॥सत्यजिन्नामराजाउ०॥मुनेप्राज्ञमहाबाहोकिं
न्नुधर्ममयाकृतं॥नदानंनचयज्ञोपिनतपोयज्ञसाधने॥३२॥व्रतमेकं
कृतंतेनसामर्थ्यमिदमिदृशं॥श्रुत्वाभानोंप्रसादेनतदाकर्णयतत्त्वतः॥३३॥

यदाकालेनकेनापिप्रजापुण्येनजायते॥षष्टीभाद्रपदेमासिकृष्णपक्षेचरो
हिणे॥३३॥नक्षत्रेचयतीपातेयोगेवारेचभूमिजे॥हस्तेजातेरवौकार्यंव्र
तमेकंसलक्षिजा॥३४॥उक्तातिथ्याश्चयोगेनघटिकापियदाभवेत्॥
घृतान्नतद्दिधातव्यंपुण्यराशीभिरीप्सुना॥३५॥कपिलायतत्तेनकथिता
मभुनातिथिः॥उवाचदीनयावाचाकुंभीनरकपीडितः॥३६॥ ॥मुनिरु
वाचतेनमहापुण्यंकपिलाग्र्यमुत्तमं॥राजावचनमाकर्ण्यत्रीकार्षीव्रत
मुत्तमं॥३७॥कपिलागोस्तथात्रदीयतेतेनसाभुविसोपिमुनिविमान
स्थोनगामघाजितात्मवान्॥३७॥कपिलायाःप्रभावेनसगतोपरमांग
तिं॥कपिलामेतद्धिविख्यातेभुवनत्रये॥एवमुक्ताततोराजासत्यजि
त्स्वर्गमागतः॥३८॥इतिस्कंदेनपार्थायधर्मतेनदुर्दिरितं॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

यथेदं ब्रह्मणाख्यातं स्कंदायपरमार्थतः॥३९॥कपिलांपूजयित्वातुस
र्वदानादापयेत्॥कपिलाऽरुणायोप्रितेनतथावैभास्करस्यच॥४०॥दा
तास्याःस्वर्गमाप्नोतिवसरान्रोमसंख्यया॥आयुर्लक्ष्मीयशोविद्यांध
नपुत्रमवाप्नुयात्॥४१॥नदीषुगंगाविबुधेषुविष्णुर्यथाप्रसिद्धोभुवन
त्रयेपि॥तथाव्रतेषुप्रवरंप्रधेयंप्रसिद्धमेतत्कपिलाभिधानं॥४२॥
॥ ॥इतिस्कंदपुराणेकपिलाषष्ठिव्रतकथासंपूर्णा॥ ॥मुक्तापुरि वा
स्तव्यमोतालाज्ञातिभट्टकालासुतकृपानाथेनलेखि॥ ॥शुभंभव
तुलेखकपाठकयोर्शुभंभवतु॥

॥१९॥